# Shri Satyanarayana Vratakatha

# શ્રીસત્યનારાયણ વ્રતકથા

## Document Information

Text title : Satyanarayana Vrata Katha

File name : satyanArAyaNavratakathA.itx

Category : vishhnu, pUjA

Location : doc_vishhnu

Proofread by : Preeti Bhandare

Latest update : November 26, 2023, kArtika pUrNimA as well as krittikA nakShatra, Deva-Diwali, tripurAri pUrNimA

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 26, 2023

*sanskritdocuments.org*

# શ્રીસત્યનારાયણ વ્રતકથા

॥ શ્રી ગણેશાય નમઃ ॥

॥ શ્રીપરમાત્મને નમઃ ॥

અથ કથા પ્રારમ્ભઃ ।

## અથ પ્રથમોऽધ્યાયઃ ।

શ્રીવ્યાસ ઉવાચ ।
એકદા નૈમિષારણ્યે ઋષયઃ શૌનકાદયઃ ।
પપ્રચ્છુર્મુનયઃ સર્વે સૂતં પૌરાણિકં ખલુ ॥ ૧॥

ઋષય ઊચુઃ ।
વ્રતેન તપસા કિં વા પ્રાપ્યતે વાઞ્છિતં ફલમ્ ।
તત્સર્વં શ્રોતુમિચ્છામઃ કથયસ્વ મહામુને ॥ ૨॥

સૂત ઉવાચ ।
નારદેનૈવ સમ્પૃષ્ટો ભગવાન્ કમલાપતિઃ ।
સુરર્ષયે યથૈવાહ તચ્છૃણુધ્વં સમાહિતાઃ ॥ ૩॥

એકદા નારદો યોગી પરાનુગ્રહકાઙ્ક્ષયા ।
પર્યટન્ વિવિધાન્ લોકાન્ મર્ત્યલોકમુપાગતઃ ॥ ૪॥

તતોદૃષ્ટ્વા જનાન્સર્વાન્ નાનાક્લેશસમન્વિતાન્ ।
નાનાયોનિસમુત્પન્નાન્ ક્લિશ્યમાનાન્ સ્વકર્મભિઃ ॥ ૫॥

કેનોપાયેન ચૈતેષાં દુઃખનાશો ભવેદ્ ધ્રુવમ્ ।
ઇતિ સઞ્ચિન્ત્ય મનસા વિષ્ણુલોકં ગતસ્તદા ॥ ૬॥

તત્ર નારાયણં દેવં શુક્લવર્ણં ચતુર્ભુજમ્ ।
શઙ્ખ-ચક્ર-ગદા-પદ્મ-વનમાલા-વિભૂષિતમ્ ॥ ૭॥

દૃષ્ટ્વા તં દેવદેવેશં સ્તોતું સમુપચક્રમે ।
નારદ ઉવાચ ।
નમો વાઙ્ગમનસાતીતરૂપાયાનન્તશક્તયે ।
આદિમધ્યાન્તહીનાય નિર્ગુણાય ગુણાત્મને ॥ ૮॥

સર્વેષામાદિભૂતાય ભક્તાનામાર્તિનાશિને ।
શ્રુત્વા સ્તોત્રં તતો વિષ્ણુર્નારદં પ્રત્યભાષત ॥ ૯॥

શ્રીભગવાનુવાચ ।
કિમર્થમાગતોઽસિ ત્વં કિં તે મનસિ વર્તતે ।
કથયસ્વ મહાભાગ તત્સર્વં કથાયામિ તે ॥ ૧૦॥

નારદ ઉવાચ ।
મર્ત્યલોકે જનાઃ સર્વે નાનાક્લેશસમન્વિતાઃ ।
નનાયોનિસમુત્પન્નાઃ પચ્યન્તે પાપકર્મભિઃ ॥ ૧૧॥

તત્કથં શમયેન્નાથ લઘૂપાયેન તદ્વદ ।
શ્રોતુમિચ્છામિ તત્સર્વં કૃપાસ્તિ યદિ તે મયિ ॥ ૧૨॥

શ્રીભગવાનુવાચ ।
સાધુ પૃષ્ટં ત્વયા વત્સ લોકાનુગ્રહકાઙ્ક્ષયા ।
યત્કૃત્વા મુચ્યતે મોહત્ તચ્છૃણુષ્વ વદામિ તે ॥ ૧૩॥

વ્રતમસ્તિ મહત્પુણ્યં સ્વર્ગે મર્ત્યે ચ દુર્લભમ્ ।
તવ સ્નેહાન્મયા વત્સ પ્રકાશઃ ક્રિયતેઽધુના ॥ ૧૪॥

સત્યનારાયણસ્યૈવ વ્રતં સમ્યગ્વિધાનતઃ । (સત્યનારાયણસ્યૈવં)
કૃત્વા સદ્યઃ સુખં ભુક્ત્વા પરત્ર મોક્ષમાપ્નુયાત્ ।
તચ્છ્રુત્વા ભગવદ્વાક્યં નારદો મુનિરબ્રવીત્ ॥ ૧૫॥

નારદ ઉવાચ ।
કિં ફલં કિં વિધાનં ચ કૃતં કેનૈવ તદ્ વ્રતમ્ ।
તત્સર્વં વિસ્તરાદ્ બ્રૂહિ કદા કાર્યં વ્રતં પ્રભો ॥ ૧૬॥ (કાર્યંહિતદ્વ્રતમ્)

શ્રીભગવાનુવાચ ।
દુઃખશોકાદિશમનં ધનધાન્યપ્રવર્ધનમ્ ॥ ૧૭॥

સૌભાગ્યસન્તતિકરં સર્વત્ર વિજયપ્રદમ્ ।
યસ્મિન્ કસ્મિન્ દિને મર્ત્યો ભક્તિશ્રદ્ધાસમન્વિતઃ ॥ ૧૮॥

સત્યનારાયણં દેવં યજેચ્ચૈવ નિશામુખે ।
બ્રાહ્મણૈર્બાન્ધવૈશ્ચૈવ સહિતો ધર્મતત્પરઃ ॥ ૧૯॥

નૈવેદ્યં ભક્તિતો દદ્યાત્ સપાદં ભક્ષ્યમુત્તમમ્ ।
રમ્ભાફલં ઘૃતં ક્ષીરં ગોધૂમસ્ય ચ ચૂર્ણકમ્ ॥ ૨૦॥

અભાવે શાલિચૂર્ણં વા શર્કરા વા ગુડસ્તથા ।
સપાદં સર્વભક્ષ્યાણિ ચૈકીકૃત્ય નિવેદયેત્ ॥ ૨૧॥

વિપ્રાય દક્ષિણાં દદ્યાત્ કથાં શ્રુત્વા જનૈઃ સહ ।
તતશ્ચ બન્ધુભિઃ સાર્ધં વિપ્રાંશ્ચ પ્રતિભોજયેત્ ॥ ૨૨॥

પ્રસાદં ભક્ષયેદ્ ભક્ત્યા નૃત્યગીતાદિકં ચરેત્ ।
તતશ્ચ સ્વગૃહં ગચ્છેત્ સત્યનારાયણં સ્મરન્ ॥ ૨૩॥

એવં કૃતે મનુષ્યાણાં વાઞ્છાસિદ્ધિર્ભવેદ્ ધ્રુવમ્ ।
વિશેષતઃ કલિયુગે લઘૂપાયોઽસ્તિ ભૂતલે ॥ ૨૪॥ (લઘૂપાયોસ્તિ)

॥ ઇતિ શ્રીસ્કન્દપુરાણે રેવાખણ્ડે શ્રીસત્યનારાયણ વ્રતકથાયાં પ્રથમોઽધ્યાયઃ ॥ ૧॥

## અથ દ્વિતીયોઽધ્યાયઃ ।

સૂત ઉવાચ ।
અથાન્યત્ સમ્પ્રવક્ષ્યામિ કૃતં યેન પુરા દ્વિજાઃ ।
કશ્ચિત્ કાશીપુરે રમ્યે હ્યાસીદ્વિપ્રોઽતિનિર્ધનઃ ॥ ૧॥ (હ્યાસીદ્વિપ્રોતિનિર્ધનઃ)

ક્ષુત્તૃડ્ભ્યાં વ્યાકુલોભૂત્વા નિત્યં બભ્રામ ભૂતલે ।
દુઃખિતં બ્રાહ્મણં દૃષ્ટ્વા ભગવાન્ બ્રાહ્મણપ્રિયઃ ॥ ૨॥

વૃદ્ધબ્રાહ્મણ રૂપસ્તં પપ્રચ્છ દ્વિજમાદરાત્ ।
કિમર્થં ભ્રમસે વિપ્ર મહીં નિત્યં સુદુઃખિતઃ ।
તત્સર્વં શ્રોતુમિચ્છામિ કથ્યતાં દ્વિજ સત્તમ ॥ ૩॥

બ્રાહ્મણ ઉવાચ ।
બ્રાહ્મણોઽતિ દરિદ્રોઽહં ભિક્ષાર્થં વૈ ભ્રમે મહીમ્ ॥ ૪॥ (બ્રાહ્મણોતિ)

ઉપાયં યદિ જાનાસિ કૃપયા કથય પ્રભો ।
વૃદ્ધબ્રાહ્મણ ઉવાચ ।

સત્યનારાયણો વિષ્ણુર્વાઞ્છિતાર્થફલપ્રદઃ ॥ ૫॥

તસ્ય ત્વં પૂજનં વિપ્ર કુરુષ્વ વ્રતમુત્તમમ । (વ્રતમુત્તમમ્)
યત્કૃત્વા સર્વદુઃખેભ્યો મુક્તો ભવતિ માનવઃ ॥ ૬॥

વિધાનં ચ વ્રતસ્યાપિ વિપ્રાયાભાષ્ય યત્નતઃ ।
સત્યનારાયણો વૃદ્ધસ્તત્રૈવાન્તરધીયત ॥ ૭॥

તદ્ વ્રતં સઙ્કરિષ્યામિ યદુક્તં બ્રાહ્મણેન વૈ ।
ઇતિ સઞ્ચિન્ત્ય વિપ્રોઽસૌ રાત્રૌ નિદ્રા ન લબ્ધવાન્ ॥ ૮॥ (નિદ્રાં)

તતઃ પ્રાતઃ સમુત્થાય સત્યનારાયણવ્રતમ્ ।
કરિષ્ય ઇતિ સઙ્કલ્પ્ય ભિક્ષાર્થમગમદ્વિજઃ ॥ ૯॥ (ભિક્ષાર્થમગમદ્ વિજઃ)

તસ્મિન્નેવ દિને વિપ્રઃ પ્રચુરં દ્રવ્યમાપ્તવાન્ ।
તેનૈવ બન્ધુભિઃ સાર્ધં સત્યસ્યવ્રતમાચરત્ ॥ ૧૦॥

સર્વદુઃખવિનિર્મુક્તઃ સર્વસમ્પત્સમન્વિતઃ ।
બભૂવ સ દ્વિજશ્રેષ્ઠો વ્રતસ્યાસ્ય પ્રભાવતઃ ॥ ૧૧॥

તતઃ પ્રભૃતિ કાલં ચ માસિ માસિ વ્રતં કૃતમ્ ।
એવં નારાયણસ્યેદં વ્રતં કૃત્વા દ્વિજોત્તમઃ ॥ ૧૨॥

સર્વપાપવિનિર્મુક્તો દુર્લભં મોક્ષમાપ્તવાન્ ।
વ્રતમસ્ય યદા વિપ્ર પૃથિવ્યાં સઙ્કરિષ્યતિ ॥ ૧૩॥ (વિપ્રાઃ)

તદૈવ સર્વદુઃખં તુ મનુજસ્ય વિનશ્યતિ । (ચ મનુજસ્ય)
એવં નારાયણેનોક્તં નારદાય મહાત્મને ॥ ૧૪॥

મયા તત્કથિતં વિપ્રાઃ કિમન્યત્ કથયામિ વઃ ।
ઋષય ઊચુઃ ।
તસ્માદ્ વિપ્રાચ્છ્રુતં કેન પૃથિવ્યાં ચરિતં મુને ।
તત્સર્વં શ્રોતુમિચ્છામઃ શ્રદ્ધાઽસ્માકં પ્રજાયતે ॥ ૧૫॥ (શ્રદ્ધાસ્માકં)

સૂત ઉવાચ ।
શ‍ૃણુધ્વં મુનયઃ સર્વે વ્રતં યેન કૃતં ભુવિ ।
એકદા સ દ્વિજવરો યથાવિભવ વિસ્તરૈઃ ॥ ૧૬॥

બન્ધુભિઃ સ્વજનૈઃ સાર્ધં વ્રતં કર્તું સમુદ્યતઃ ।
એતસ્મિન્નન્તરે કાલે કાષ્ઠક્રેતા સમાગમત્ ॥ ૧૭॥

બહિઃ કાષ્ઠં ચ સંસ્થાપ્ય વિપ્રસ્ય ગૃહમાયયૌ ।
તૃષ્ણાયા પીડિતાત્મા ચ દૃષ્ટ્વા વિપ્રં કૃતં વ્રતમ્ ॥ ૧૮॥ (કૃત)

પ્રણિપત્ય દ્વિજં પ્રાહ કિમિદં ક્રિયતે ત્વયા ।
કૃતે કિં ફલમાપ્નોતિ વિસ્તરાદ્ વદ મે પ્રભો ॥ ૧૯॥ (વિસ્તારાદ્)

વિપ્ર ઉવાચ ।
સત્યનારાયણેસ્યેદં વ્રતં સર્વેપ્સિતપ્રદમ્ ।
તસ્ય પ્રસાદાન્મે સર્વં ધનધાન્યાદિકં મહત્ ॥ ૨૦॥

તસ્માદેતદ્ વ્રતં જ્ઞાત્વા કાષ્ઠક્રેતાऽતિહર્ષિતઃ ।
પપૌ જલં પ્રસાદં ચ ભુક્ત્વા સ નગરં યયૌ ॥ ૨૧॥

સત્યનારાયણં દેવં મનસા ઇત્યચિન્તયત્ ।
કાષ્ઠં વિક્રયતો ગ્રામે પ્રાપ્યતે ચાદ્ય યદ્ ધનમ્ ॥ ૨૨॥ (પ્રાપ્યતેમેऽદ્ય)

તેનૈવ સત્યદેવસ્ય કરિષ્યે વ્રતમુત્તમમ્ ।
ઇતિ સઞ્ચિન્ત્ય મનસા કાષ્ઠં ધૃત્વા તુ મસ્તકે ॥ ૨૩॥

જગામ નગરે રમ્યે ધનિનાં યત્ર સંસ્થિતિઃ ।
તદ્દિને કાષ્ઠમૂલ્યં ચ દ્વિગુણં પ્રાપ્તવાનસૌ ॥ ૨૪॥

તતઃ પ્રસન્નહૃદયઃ સુપક્વં કદલી ફલમ્ ।
શર્કરાઘૃતદુગ્ધં ચ ગોધૂમસ્ય ચ ચૂર્ણકમ્ ॥ ૨૫॥

કૃત્વૈકત્ર સપાદં ચ ગૃહીત્વા સ્વગૃહં યયૌ ।
તતો બન્ધૂન્ સમાહૂય ચકાર વિધિના વ્રતમ્ ॥ ૨૬॥

તદ્ વ્રતસ્ય પ્રભાવેણ ધનપુત્રાન્વિતોऽભવત્ । (ધનપુત્રાન્વિતોભવત્)
ઇહલોકે સુખં ભુક્ત્વા ચાન્તે સત્યપુરં યયૌ ॥ ૨૭॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે રેવાખણ્ડે શ્રીસત્યનારાયણ વ્રતકથાયાં દ્વિતીયોऽધ્યાયઃ ॥ ૨॥

## અથ તૃતીયોऽધ્યાયઃ ।

સૂત ઉવાચ ।
પુનરગ્રે પ્રવક્ષ્યામિ શ‍ૃણુધ્વં મુનિ સત્તમાઃ ।
પુરા ચોલ્કામુખો નામ નૃપશ્ચાસીન્મહામતિઃ ॥ ૧॥

જિતેન્દ્રિયઃ સત્યવાદી યયૌ દેવાલયં પ્રતિ ।

દિને દિને ધનં દત્ત્વા દ્વિજાન્ સન્તોષયત્ સુધીઃ ॥ ૨॥

ભાર્યા તસ્ય પ્રમુગ્ધા ચ સરોજવદના સતી ।
ભદ્રશીલાનદી તીરે સત્યસ્યવ્રતમાચરત્ ॥ ૩॥

એતસ્મિન્નન્તરે તત્ર સાધુરેકઃ સમાગતઃ ।
વાણિજ્યાર્થં બહુધનૈરનેકૈઃ પરિપૂરિતઃ ॥ ૪॥

નાવં સંસ્થાપ્ય તત્તીરે જગામ નૃપતિં પ્રતિ ।
દૃષ્ટ્વા સ વ્રતિનં ભૂપં પ્રપચ્છ વિનયાન્વિતઃ ॥ ૫॥

સાધુરુવાચ ।
કિમિદં કુરુષે રાજન્ ભક્તિયુક્તેન ચેતસા ।
પ્રકાશં કુરુ તત્સર્વં શ્રોતુમિચ્છામિ સામ્પ્રતમ્ ॥ ૬॥

રાજોવાચ ।
પૂજનં ક્રિયતે સાધો વિષ્ણોરતુલતેજસઃ ।
વ્રતં ચ સ્વજનૈઃ સાર્ધં પુત્રાદ્યાવાપ્તિ કામ્યયા ॥ ૭॥

ભૂપસ્ય વચનં શ્રુત્વા સાધુઃ પ્રોવાચ સાદરમ્ ।
સર્વં કથય મે રાજન્ કરિષ્યેઽહં તવોદિતમ્ ॥ ૮॥

મમાપિ સન્તતિર્નાસ્તિ હ્યેતસ્માજ્જાયતે ધ્રુવમ્ ।
તતો નિવૃત્ત્ય વાણિજ્યાત્ સાનન્દો ગૃહમાગતઃ ॥ ૯॥

ભાર્યાયૈ કથિતં સર્વં વ્રતં સન્તતિ દાયકમ્ ।
તદા વ્રતં કરિષ્યામિ યદા મે સન્તતિર્ભવેત્ ॥ ૧૦॥

ઇતિ લીલાવતીં પ્રાહ પત્નીં સાધુઃ સ સત્તમઃ ।
એકસ્મિન્ દિવસે તસ્ય ભાર્યા લીલાવતી સતી ॥ ૧૧॥ (ભાર્યા)

ભર્તૃયુક્તાનન્દચિત્તાઽભવદ્ ધર્મપરાયણા ।
ર્ગભિણી સાઽભવત્ તસ્ય ભાર્યા સત્યપ્રસાદતઃ ॥ ૧૨॥ (સાભવત્)

દશમે માસિ વૈ તસ્યાઃ કન્યારત્નમજાયત ।
દિને દિને સા વવૃધે શુક્લપક્ષે યથા શશી ॥ ૧૩॥

નામ્ના કલાવતી ચેતિ તન્નામકરણં કૃતમ્ ।
તતો લીલાવતી પ્રાહ સ્વામિનં મધુરં વચઃ ॥ ૧૪॥

ન કરોષિ કિમર્થં વૈ પુરા સઙ્કલ્પિતં વ્રતમ્ ।

સાધુરુવાચ ।
વિવાહ સમયે ત્વસ્યાઃ કરિષ્યામિ વ્રતં પ્રિયે ॥ ૧૫॥

ઇતિ ભાર્યાં સમાશ્વાસ્ય જગામ નગરં પ્રતિ ।
તતઃ કલાવતી કન્યા વવૃધે પિતૃવેશ્મનિ ॥ ૧૬॥

દૃષ્ટ્વા કન્યાં તતઃ સાધુર્નગરે સખિભિઃ સહ ।
મન્ત્રયિત્વા દ્રુતં દૂતં પ્રેષયામાસ ધર્મવિત્ ॥ ૧૭॥

વિવાહાર્થં ચ કન્યાયા વરં શ્રેષ્ઠં વિચારય ।
તેનાજ્ઞપ્તશ્ચ દૂતોઽસૌ કાઞ્ચનં નગરં યયૌ ॥ ૧૮॥

તસ્માદેકં વણિક્પુત્રં સમાદાયાગતો હિ સઃ ।
દૃષ્ટ્વા તુ સુન્દરં બાલં વણિક્પુત્રં ગુણાન્વિતમ્ ॥ ૧૯॥

જ્ઞાતિભિર્બન્ધુભિઃ સાર્ધં પરિતુષ્ટેન ચેતસા ।
દત્તાવાન્ સાધુપુત્રાય કન્યાં વિધિવિધાનતઃ ॥ ૨૦॥ (સાધુઃપુત્રાય)

તતોઽભાગ્યવશાત્ તેન વિસ્મૃતં વ્રતમુત્તમમ્ । (તતોભાગ્યવશાત્)
વિવાહસમયે તસ્યાસ્તેન રુષ્ટો ભવત્ પ્રભુઃ ॥ ૨૧॥ (રુષ્ટોઽભવત્)

તતઃ કાલેન નિયતો નિજકર્મ વિશારદઃ ।
વાણિજ્યાર્થં તતઃ શીઘ્રં જામાતૃ સહિતો વણિક્ ॥ ૨૨॥

રત્નસારપુરે રમ્યે ગત્વા સિન્ધુ સમીપતઃ ।
વાણિજ્યમકરોત્ સાધુર્જામાત્રા શ્રીમતા સહ ॥ ૨૩॥

તૌ ગતૌ નગરે રમ્યે ચન્દ્રકેતોર્નૃપસ્ય ચ । (નગરેતસ્ય)
એતસ્મિન્નેવ કાલે તુ સત્યનારાયણઃ પ્રભુઃ ॥ ૨૪॥

ભ્રષ્ટપ્રતિજ્ઞમાલોક્ય શાપં તસ્મૈ પ્રદત્તવાન્ ।
દારુણં કઠિનં ચાસ્ય મહદ્ દુઃખં ભવિષ્યતિ ॥ ૨૫॥

એકસ્મિન્દિવસે રાજ્ઞો ધનમાદાય તસ્કરઃ ।
તત્રૈવ ચાગત શ્ચૌરો વણિજૌ યત્ર સંસ્થિતૌ ॥ ૨૬॥

તત્પશ્ચાદ્ ધાવકાન્ દૂતાન્ દૃષ્ટ્વા ભીતેન ચેતસા ।
ધનં સંસ્થાપ્ય તત્રૈવ સ તુ શીઘ્રમલક્ષિતઃ ॥ ૨૭॥

તતો દૂતાઃસમાયાતા યત્રાસ્તે સજ્જનો વણિક્ ।
દૃષ્ટ્વા નૃપધનં તત્ર બદ્ધ્વાઽઽનીતૌ વણિક્સુતૌ ॥ ૨૮॥ (બદ્ધ્વાનીતૌ)

હર્ષેણ ધાવમાનાશ્ચ પ્રોચુર્નૃપસમીપતઃ ।
તસ્કરૌ દ્વૌ સમાનીતૌ વિલોક્યાજ્ઞાપય પ્રભો ॥ ૨૯॥

રાજ્ઞાઽઽજ્ઞપ્તાસ્તતઃ શીઘ્રં દૃઢં બદ્ધ્વા તુ તા વુભૌ ।
સ્થાપિતૌ દ્વૌ મહાદુર્ગે કારાગારેઽવિચારતઃ ॥ ૩૦॥

માયયા સત્યદેવસ્ય ન શ્રુતં કૈસ્તયોર્વચઃ ।
અતસ્તયોર્ધનં રાજ્ઞા ગૃહીતં ચન્દ્રકેતુના ॥ ૩૧॥

તચ્છાપાચ્ચ તયોર્ગેહે ભાર્યા ચૈવાતિ દુઃખિતા ।
ચૌરેણાપહૃતં સર્વં ગૃહે યચ્ચ સ્થિતં ધનમ્ ॥ ૩૨॥

આધિવ્યાધિસમાયુક્તા ક્ષુત્પિપાશાતિ દુઃખિતા । (ક્ષુત્પિપાસાતિ)
અન્નચિન્તાપરા ભૂત્વા બભ્રામ ચ ગૃહે ગૃહે ।
કલાવતી તુ કન્યાપિ બભ્રામ પ્રતિવાસરમ્ ॥ ૩૩॥

એકસ્મિન્ દિવસે યાતા ક્ષુધાર્તા દ્વિજમન્દિરમ્ । (દિવસે જાતા)
ગત્વાઽપશ્યદ્ વ્રતં તત્ર સત્યનારાયણસ્ય ચ ॥ ૩૪॥ (ગત્વાપશ્યદ્)

ઉપવિશ્ય કથાં શ્રુત્વા વરં પ્રાર્થિતવત્યપિ ।
પ્રસાદ ભક્ષણં કૃત્વા યયૌ રાત્રૌ ગૃહં પ્રતિ ॥ ૩૫॥

માતા કલાવતીં કન્યાં કથયામાસ પ્રેમતઃ ।
પુત્રિ રાત્રૌ સ્થિતા કુત્ર કિં તે મનસિ વર્તતે ॥ ૩૬॥

કન્યા કલાવતી પ્રાહ માતરં પ્રતિ સત્વરમ્ ।
દ્વિજાલયે વ્રતં માતર્દૃષ્ટં વાઞ્છિતસિદ્ધિદમ્ ॥ ૩૭॥

તચ્છ્રુત્વા કન્યકા વાક્યં વ્રતં કર્તું સમુદ્યતા ।
સા મુદા તુ વણિગ્ભાર્યા સત્યનારાયણસ્ય ચ ॥ ૩૮॥

વ્રતં ચક્રે સૈવ સાધ્વી બન્ધુભિઃ સ્વજનૈઃ સહ ।
ભર્તૃજામાતરૌ ક્ષિપ્રમાગચ્છેતાં સ્વમાશ્રમમ્ ॥ ૩૯॥

અપરાધં ચ મે ભર્તુર્જામાતુઃ ક્ષન્તુમર્હસિ ।
વ્રતેનાનેન તુષ્ટોઽસૌ સત્યનારાયણઃ પુનઃ ॥ ૪૦॥ (તુષ્ટોસૌ)

દર્શયામાસ સ્વપ્નં હી ચન્દ્રકેતું નૃપોત્તમમ્ ।
બન્દિનૌ મોચય પ્રાતર્વણિજૌ નૃપસત્તમ ॥ ૪૧॥

દેયં ધનં ચ તત્સર્વં ગૃહીતં યત્ ત્વયાઽધુના । (ત્વયાધુના)
નો ચેત્ ત્વાં નાશયિષ્યામિ સરાજ્યધનપુત્રકમ્ ॥ ૪૨॥

એવમાભાષ્ય રાજાનં ધ્યાનગમ્યોઽભવત્ પ્રભુઃ । (ધ્યાનગમ્યોભવત્)
તતઃ પ્રભાતસમયે રાજા ચ સ્વજનૈઃ સહ ॥ ૪૩॥

ઉપવિશ્ય સભામધ્યે પ્રાહ સ્વપ્નં જનં પ્રતિ ।
બદ્ધૌ મહાજનૌ શીઘ્રં મોચય દ્વૌ વણિક્સુતૌ ॥ ૪૪॥

ઇતિ રાજ્ઞો વચઃ શ્રુત્વા મોચયિત્વા મહાજનૌ ।
સમાનીય નૃપસ્યાગ્રે પ્રાહુસ્તે વિનયાન્વિતાઃ ॥ ૪૫॥

આનીતૌ દ્વૌ વણિક્પુત્રૌ મુક્તૌ નિગડબન્ધનાત્ ।
તતો મહાજનૌ નત્વા ચન્દ્રકેતું નૃપોત્તમમ્ ॥ ૪૬॥

સ્મરન્તૌ પૂર્વ વૃત્તાન્તં નોચતુર્ભયવિહ્વલૌ ।
રાજા વણિક્સુતૌ વીક્ષ્ય વચઃ પ્રોવાચ સાદરમ્ ॥ ૪૭॥

દેવાત્ પ્રાપ્તં મહદ્દુઃખમિદાનીં નાસ્તિ વૈ ભયમ્ ।
તદા નિગડસન્ત્યાગં ક્ષૌરકર્માદ્યકારયત્ ॥ ૪૮॥

વસ્ત્રાલઙ્કારકં દત્ત્વા પરિતોષ્ય નૃપશ્ચ તૌ ।
પુરસ્કૃત્ય વણિક્પુત્રૌ વચસાઽતોષયદ્ ભૃશમ્ ॥ ૪૯॥ (વચસાતોષયદ્ભૃશમ્)

પુરાનીતં તુ યદ્ દ્રવ્યં દ્વિગુણીકૃત્ય દત્તવાન્ ।
પ્રોવાચ ચ તતો રાજા ગચ્છ સાધો નિજાશ્રમમ્ ॥ ૫૦॥ (પ્રોવાચતૌ)

રાજાનં પ્રણિપત્યાહ ગન્તવ્યં ત્વત્પ્રસાદતઃ ।
ઇત્યુક્ત્વા તૌ મહાવૈશ્યૌ જગ્મતુઃ સ્વગૃહં પ્રતિ ॥ ૫૧॥ (મહાવૈશ્યો)

॥ ઇતિ શ્રીસ્કન્દ પુરાણે રેવાખણ્ડે શ્રીસત્યનારાયણ વ્રતકથાયાં તૃતીયોઽધ્યાયઃ ॥ ૩॥

## અથ ચતુર્થોઽધ્યાયઃ ।

સૂત ઉવાચ ।
યાત્રાં તુ કૃતવાન્ સાધુર્મઙ્ગલાયનપૂર્વિકામ્ ।
બ્રાહ્મણેભ્યો ધનં દત્ત્વા તદા તુ નગરં યયૌ ॥ ૧॥

કિયદ્ દૂરે ગતે સાધો સત્યનારાયણઃ પ્રભુઃ ।
જિજ્ઞાસાં કૃતવાન્ સાધૌ કિમસ્તિ તવ નૌસ્થિતમ્ ॥ ૨॥

તતો મહાજનૌ મત્તૌ હેલયા ચ પ્રહસ્ય વૈ । (મતૌ)
કથં પૃચ્છસિ ભો દણ્ડિન્ મુદ્રાં નેતું કિમિચ્છસિ ॥ ૩॥

લતાપત્રાદિકં ચૈવ વર્તતે તરણૌ મમ ।
નિષ્ઠુરં ચ વચઃ શ્રુત્વા સત્યં ભવતુ તે વચઃ ॥ ૪॥

એવમુક્ત્વા ગતઃ શીઘ્રં દણ્ડી તસ્ય સમીપતઃ ।
કિયદ્ દૂરે તતો ગત્વા સ્થિતઃ સિન્ધુ સમીપતઃ ॥ ૫॥

ગતે દણ્ડિનિ સાધુશ્ચ કૃતનિત્યક્રિયસ્તદા ।
ઉત્થિતાં તરણીં દૃષ્ટ્વા વિસ્મયં પરમં યયૌ ॥ ૬॥

દૃષ્ટ્વા લતાદિકં ચૈવ મૂર્ચ્છિતો ન્યપતદ્ ભુવિ ।
લબ્ધસંજ્ઞો વણિક્પુત્રસ્તતશ્ચિન્તાન્વિતોઽભવત્ ॥ ૭॥ (વણિક્પુત્રસ્તતશ્ચિન્તાન્વિતોભવત્)

તદા તુ દુહિતુઃ કાન્તો વચનં ચેદમબ્રવીત્ ।
કિમર્થં ક્રિયતે શોકઃ શાપો દત્તશ્ચ દણ્ડિના ॥ ૮॥

શક્યતે તેન સર્વં હિ કર્તું ચાત્ર ન સંશયઃ । (શક્યતેને ન)
અતસ્તચ્છરણં યામો વાઞ્છતાર્થો ભવિષ્યતિ ॥ ૯॥ (વાઞ્છિતાર્થો)

જામાતુર્વચનં શ્રુત્વા તત્સકાશં ગતસ્તદા ।
દૃષ્ટ્વા ચ દણ્ડિનં ભક્ત્યા નત્વા પ્રોવાચ સાદરમ્ ॥ ૧૦॥

ક્ષમસ્વ ચાપરાધં મે યદુક્તં તવ સન્નિધૌ ।
એવં પુનઃ પુનર્નત્વા મહાશોકાકુલોઽભવત્ ॥ ૧૧॥ (મહાશોકાકુલોભવત્)

પ્રોવાચ વચનં દણ્ડી વિલપન્તં વિલોક્ય ચ ।
મા રોદીઃ શૃણુમદ્વાક્યં મમ પૂજાબહિર્મુખઃ ॥ ૧૨॥

મમાજ્ઞયા ચ દુર્બુદ્ધે લબ્ધં દુઃખં મુહુર્મુહુઃ ।
તચ્છ્રુત્વા ભગવદ્વાક્યં સ્તુતિં કર્તું સમુદ્યતઃ ॥ ૧૩॥

સાધુરુવાચ ।
ત્વન્માયામોહિતાઃ સર્વે બ્રહ્માદ્યાસ્ત્રિદિવૌકસઃ ।
ન જાનન્તિ ગુણાન્ રૂપં તવાશ્ચર્યમિદં પ્રભો ॥ ૧૪॥

મૂઢોઽહં ત્વાં કથં જાને મોહિતસ્તવમાયયા । (મૂઢોહં)
પ્રસીદ પૂજયિષ્યામિ યથાવિભવવિસ્તરૈઃ ॥ ૧૫॥

પુરા વિત્તં ચ તત્ સર્વં ત્રાહિ માં શરણાગતમ્ ।
શ્રુત્વા ભક્તિયુતં વાક્યં પરિતુષ્ટો જનાર્દનઃ ॥ ૧૬॥

વરં ચ વાઞ્છિતં દત્ત્વા તત્રૈવાન્તર્દધે હરિઃ ।
તતો નાવં સમારૂહ્ય દૃષ્ટ્વા વિત્તપ્રપૂરિતામ્ ॥ ૧૭॥

કૃપયા સત્યદેવસ્ય સફલં વાઞ્છિતં મમ ।
ઇત્યુક્ત્વા સ્વજનૈઃ સાર્ધં પૂજાં કૃત્વા યથાવિધિ ॥ ૧૮॥

હર્ષેણ ચાભવત્ પૂર્ણઃસત્યદેવપ્રસાદતઃ ।
નાવં સંયોજ્ય યત્નેન સ્વદેશગમનં કૃતમ્ ॥ ૧૯॥

સાધુર્જામાતરં પ્રાહ પશ્ય રત્નપુરીં મમ ।
દૂતં ચ પ્રેષયામાસ નિજવિત્તસ્ય રક્ષકમ્ ॥ ૨૦॥

તતોઽસૌ નગરં ગત્વા સાધુભાર્યાં વિલોક્ય ચ । (દૂતોસૌ)
પ્રોવાચ વાઞ્છિતં વાક્યં નત્વા બદ્ધાઞ્જલિસ્તદા ॥ ૨૧॥

નિકટે નગરસ્યૈવ જામાત્રા સહિતો વણિક્ ।
આગતો બન્ધુવર્ગૈશ્ચ વિત્તૈશ્ચ બહુભિર્યુતઃ ॥ ૨૨॥

શ્રુત્વા દૂતમુખાદ્વાક્યં મહાહર્ષવતી સતી ।
સત્યપૂજાં તતઃ કૃત્વા પ્રોવાચ તનુજાં પ્રતિ ॥ ૨૩॥

વ્રજામિ શીઘ્રમાગચ્છ સાધુસન્દર્શનાય ચ ।
ઇતિ માતૃવચઃ શ્રુત્વા વ્રતં કૃત્વા સમાપ્ય ચ ॥ ૨૪॥

પ્રસાદં ચ પરિત્યજ્ય ગતા સાઽપિ પતિં પ્રતિ । (સાપિ)
તેન રુષ્ટાઃ સત્યદેવો ભર્તારં તરણિં તથા ॥ ૨૫॥ (રુષ્ટઃ, તરણીં)

સંહૃત્ય ચ ધનૈઃ સાર્ધં જલે તસ્યાવમજ્જયત્ ।
તતઃ કલાવતી કન્યા ન વિલોક્ય નિજં પતિમ્ ॥ ૨૬॥

શોકેન મહતા તત્ર રુદન્તી ચાપતદ્ ભુવિ । (રુદતી)
દૃષ્ટ્વા તથાવિધાં નાવં કન્યાં ચ બહુદુઃખિતામ્ ॥ ૨૭॥

ભીતેન મનસા સાધુઃ કિમાશ્ચર્યમિદં ભવેત્ ।
ચિન્ત્યમાનાશ્ચ તે સર્વે બભૂવુસ્તરિવાહકાઃ ॥ ૨૮॥

તતો લીલાવતી કન્યાં દૃષ્ટ્વા સા વિહ્વલાઽભવત્ ।
વિલલાપાતિદુઃખેન ભર્તારં ચેદમબ્રવીત ॥ ૨૯॥

ઇદાનીં નૌકયા સાર્ધં કથં સોઽભૂદલક્ષિતઃ ।
ન જાને કસ્ય દેવસ્ય હેલયા ચૈવ સા હૃતા ॥ ૩૦॥

સત્યદેવસ્ય માહાત્મ્યં જ્ઞાતું વા કેન શક્યતે ।
ઇત્યુક્ત્વા વિલલાપૈવ તતશ્ચ સ્વજનૈઃ સહ ॥ ૩૧॥

તતો લીલાવતી કન્યાં ક્રૌડે કૃત્વા રુરોદ હ ।
તતઃકલાવતી કન્યા નષ્ટે સ્વામિનિ દુઃખિતા ॥ ૩૨॥

ગૃહીત્વા પાદુકે તસ્યાનુગતું ચ મનોદધે । (પાદુકાં)
કન્યાયાશ્ચરિતં દૃષ્ટ્વા સભાર્યઃ સજ્જનો વણિક્ ॥ ૩૩॥

અતિશોકેન સન્તપ્તશ્ચિન્તયામાસ ધર્મવિત્ ।
હૃતં વા સત્યદેવેન ભ્રાન્તોઽહં સત્યમાયયા ॥ ૩૪॥

સત્યપૂજાં કરિષ્યામિ યથાવિભવવિસ્તરૈઃ ।
ઇતિ સર્વાન્ સમાહૂય કથયિત્વા મનોરથમ્ ॥ ૩૫॥

નત્વા ચ દણ્ડવદ્ ભૂમૌ સત્યદેવં પુનઃ પુનઃ ।
તતસ્તુષ્ટઃ સત્યદેવો દીનાનાં પરિપાલકઃ ॥ ૩૬॥

જગાદ વચનં ચૈનં કૃપયા ભક્તવત્સલઃ ।
ત્યક્ત્વા પ્રસાદં તે કન્યા પતિં દ્રષ્ટું સમાગતા ॥ ૩૭॥

અતોઽદૃષ્ટોઽભવત્તસ્યાઃ કન્યકાયાઃ પતિર્ધ્રુવમ્ ।
ગૃહં ગત્વા પ્રસાદં ચ ભુક્ત્વા સાઽઽયાતિ ચેત્પુનઃ ॥ ૩૮॥ (સાયાતિ)

લબ્ધભર્ત્રી સુતા સાધો ભવિષ્યતિ ન સંશયઃ ।
કન્યકા તાદૃશં વાક્યં શ્રુત્વા ગગનમણ્ડલાત્ ॥ ૩૯॥

ક્ષિપ્રં તદા ગૃહં ગત્વા પ્રસાદં ચ બુભોજ સા ।
પશ્ચાત્ સા પુનરાગત્ય દદર્શ સ્વજનં પતિમ્ ॥ ૪૦॥ (સાપશ્ચાત્પુનરાગત્ય, સજનં)

તતઃ કલાવતી કન્યા જગાદ પિતરં પ્રતિ ।
ઇદાનીં ચ ગૃહં યાહિ વિલમ્બં કુરુષે કથમ્ ॥ ૪૧॥

તચ્છ્રુત્વા કન્યકાવાક્યં સન્તુષ્ટોઽભૂદ્વણિક્સુતઃ ।
પૂજનં સત્યદેવસ્ય કૃત્વા વિધિવિધાનતઃ ॥ ૪૨॥

ધનૈર્બન્ધુગણૈઃ સાર્ધં જગામ નિજમન્દિરમ્ ।

પૌર્ણમાસ્યાં ચ સઙ્ક્રાન્તૌ કૃતવાન્ સત્યસ્ય પૂજનમ્ ॥ ૪૩॥ (સત્યપૂજનમ્)

ઇહલોકે સુખં ભુક્ત્વા ચાન્તે સત્યપુરં યયૌ ॥ ૪૪॥

॥ ઇતિ શ્રીસ્કન્દ પુરાણે રેવાખણ્ડે શ્રીસત્યનારાયણ વ્રતકથાયાં ચતુર્થોઽધ્યાયઃ ॥ ૪॥

## અથ પઞ્ચમોઽધ્યાયઃ ।

સૂત ઉવાચ ।
અથાન્યચ્ચ પ્રવક્ષ્યામિ શ્રુણુધ્વં મુનિસત્તમાઃ ।
આસીત્ તુઙ્ગધ્વજો રાજા પ્રજાપાલનતત્પરઃ ॥ ૧॥

પ્રસાદં સત્યદેવસ્ય ત્યક્ત્વા દુઃખમવાપ સઃ ।
એકદા સ વનં ગત્વા હત્વા બહુવિધાન્ પશૂન્ ॥ ૨॥

આગત્ય વટમૂલં ચ દૃષ્ટ્વા સત્યસ્ય પૂજનમ્ । (ચાપશ્યત્)
ગોપાઃ કુર્વન્તિ સન્તુષ્ટા ભક્તિયુક્તાઃ સ બાન્ધવાઃ ॥ ૩॥

રાજા દૃષ્ટ્વા તુ દર્પેણ ન ગતો ન નનામ સઃ ।
તતો ગોપગણાઃ સર્વે પ્રસાદં નૃપસન્નિધૌ ॥ ૪॥

સંસ્થાપ્ય પુનરાગત્ય ભુક્તત્વા સર્વે યથેપ્સિતમ્ ।
તતઃ પ્રસાદં સન્ત્યજ્ય રાજા દુઃખમવાપ સઃ ॥ ૫॥

તસ્ય પુત્રશતં નષ્ટં ધનધાન્યાદિકં ચ યત્ ।
સત્યદેવેન તત્સર્વં નાશિતં મમ નિશ્ચિતમ્ ॥ ૬॥

અતસ્તત્રૈવ ગચ્છામિ યત્ર દેવસ્ય પૂજનમ્ ।
મનસા તુ વિનિશ્ચિત્ય યયૌ ગોપાલસન્નિધૌ ॥ ૭॥

તતોઽસૌ સત્યદેવસ્ય પૂજાં ગોપગણૈઃસહ ।
ભક્તિશ્રદ્ધાન્વિતો ભૂત્વા ચકાર વિધિના નૃપઃ ॥ ૮॥

સત્યદેવપ્રસાદેન ધનપુત્રાન્વિતોઽભવત્ ।
ઇહલોકે સુખં ભુક્તત્વા ચાન્તે સત્યપુરં યયૌ ॥ ૯॥

ય ઇદં કુરુતે સત્યવ્રતં પરમદુર્લભમ્ ।
શ ૃણોતિ ચ કથાં પુણ્યાં ભક્તિયુક્તઃ ફલપ્રદામ્ ॥ ૧૦॥

ધનધાન્યાદિકં તસ્ય ભવેત્ સત્યપ્રસાદતઃ ।

દરિદ્રો લભતે વિત્તં બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૧૧॥

ભીતો ભયાત્ પ્રમુચ્યેત સત્યમેવ ન સંશયઃ ।
ઈપ્સિતં ચ ફલં ભુક્ત્વા ચાન્તે સત્યપુરંવ્રજેત્ ॥ ૧૨॥

ઇતિ વઃ કથિતં વિપ્રાઃ સત્યનારાયણવ્રતમ્ ।
યત્ કૃત્વા સર્વદુઃખેભ્યો મુક્તો ભવતિ માનવઃ ॥ ૧૩॥

વિશેષતઃ કલિયુગે સત્યપૂજા ફલપ્રદા ।
કેચિત્ કાલં વદિષ્યન્તિ સત્યમીશં તમેવ ચ ॥ ૧૪॥

સત્યનારાયણં કેચિત્ સત્યદેવં તથાપરે ।
નાનારૂપધરો ભૂત્વા સર્વેષામીપ્સિતપ્રદમ્ ॥ ૧૫॥ (સર્વેષામીપ્સિતપ્રદઃ)

ભવિષ્યતિ કલૌ સત્યવ્રતરૂપી સનાતનઃ ।
શ્રીવિષ્ણુના ધૃતં રૂપં સર્વેષામીપ્સિતપ્રદમ્ ॥ ૧૬॥

ય ઇદં પઠતે નિત્યં શ‌ૃણોતિ મુનિસત્તમાઃ ।
તસ્ય નશ્યન્તિ પાપાનિ સત્યદેવપ્રસાદતઃ ॥ ૧૭॥

વ્રતં યૈસ્તુ કૃતં પૂર્વં સત્યનારાયણસ્ય ચ ।
તેષાં ત્વપરજન્માનિ કથયામિ મુનીશ્વરાઃ ॥ ૧૮॥

શતાનન્દોમહાપ્રાજ્ઞઃસુદામાબ્રાહ્મણો હ્યભૂત્ ।
તસ્મિઞ્જન્મનિ શ્રીકૃષ્ણં ધ્યાત્વા મોક્ષમવાપ હ ॥ ૧૯॥

કાષ્ઠભારવહો ભિલ્લો ગુહરાજો બભૂવ હ ।
તસ્મિઞ્જન્મનિ શ્રીરામં સેવ્ય મોક્ષં જગામ વૈ ॥ ૨૦॥

ઉલ્કામુખો મહારાજો નૃપો દશરથોઽભવત્ ।
શ્રીરઙ્ગનાથં સમ્પૂજ્ય શ્રીવૈકુણ્ઠં તદાગમત્ ॥ ૨૧॥ (શ્રીરામચન્દ્રસમ્પ્રાપ્ય)

ધાર્મિકઃ સત્યસન્ધશ્ચ સાધુર્મોરધ્વજોઽભવત્ । (સાધુર્મોરધ્વજોભવત્)
દેહાર્ધં ક્રકચૈશ્છિત્ત્વા દત્વા મોક્ષમવાપ હ ॥ ૨૨॥

તુઙ્ગધ્વજો મહારાજઃ સ્વાયમ્ભુવોઽભવત્ કિલ । (સ્વાયમ્ભૂરભવત્)
સર્વાન્ ભાગવતાન્ કૃત્વા શ્રીવૈકુણ્ઠં તદાઽગમત્ ॥ ૨૩॥ (કૃત્ત્વા, તદાગમત્)

ભૂત્વા ગોપાશ્ચ તે સર્વે વ્રજમણ્ડલવાસિનઃ ।
નિહત્ય રાક્ષસાન્ સર્વાન્ ગોલોકં તુ તદા યયુઃ ॥ ૨૪॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે રેવાખણ્ડે શ્રીસત્યનારાયણ વ્રતકથાયાં પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

Proofread by Preeti Bhandare

---

*Shri Satyanarayana Vratakatha*

pdf was typeset on November 26, 2023

Please send corrections to *sanskrit@cheerful.com*